सतरमजीर्णसंशान्त्यै वह्नेर्वृद्ध्यै कफघ्नत्वै" ॥
अजीर्णकण्टको रसः ॥ * ॥
"जलपीतमपामार्गमूलं हन्याद्विसूचिकां ।
सतैलं कारवेल्लाम्बु विधुनोति विसूचिकां ॥
वालमूलस्य निःक्वाथः पिप्पलीचूर्णसंयुतः ।
विसूचीनाशनः श्रेष्ठो जठराग्निविवर्द्धनः ॥
बिल्वनागरनिःक्वाथो हन्याच्छर्द्दिविसूचिकां ।
बिल्वनागरकैडर्य्यक्वाथस्तदधिको गुणैः" ॥
कैडर्य्यं कट्फलम्,—
"व्योषं करञ्जस्य फलं हरिद्रे
मूलं समावाप्य च मातुलुङ्ग्याः ।
छायाविशुष्का गुटिकाः कृतास्ता
हन्युर्विसूचीं नयनाञ्जनेन" ॥
मातुलुङ्गी मधुकर्कटी । अनुभूतमिदम्,—
"अपामार्गस्य पत्राणि मरिचानि समानि च ।
अश्वस्य लालया पिष्टान्यञ्जनाद् घ्नन्ति सूचिकां ॥
विसूच्यामतिवृद्धायां तक्रं दधिसमं जलं ।
नारिकेलाम्बु पेयं वा प्राणत्राणाय योजयेत् ॥
त्वक्पत्ररास्नागुरुशिग्रुकुष्ठै-
रम्लप्रपिष्टैः सवचाशताह्वैः ।
उद्वर्त्तनं खल्लिविसूचिकाघ्नं
तैलं विपक्वञ्च तदर्थकारि" ॥
त्वक् तैलम् ॥ * ॥
"कुष्ठसैन्धवयोः कल्कः चुक्रं तैलं तु तच्छृतं ।
विसूच्या मर्द्दनं तेन खल्लीशूलनिवारणम्" ॥
कुष्ठतैलम् ॥ * ॥
"पिपासायां तथोत्क्लेशे लवङ्गस्याम्बु शस्यते ।
जातीफलस्य वा शीतं शृतं भद्रघनस्य वा ॥ * ॥
उत्क्लेशलक्षणम्,—
"उत्क्लिश्यान्नं न निर्गच्छेत् प्रसेकष्ठीवनेरितं ।
हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्द्दिशेदिति ॥
सरुग्ध्वानमुदरमम्लपिष्टैः प्रलेपयेत् ।
दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः" ॥
हैमवती श्वेतवचा । दारुषट्कम् ॥ * ॥
"तक्रेण युक्तं यवचूर्णमुष्णं
सक्षारमार्त्तिं जठरे निहन्यात् ।
स्वेदो घटैर्व्वा बहुवाष्पपूर्णै-
रुष्णैस्तथान्यैरपि पाणितापैः ॥
विलम्बिकालसकयोरप्येवं क्रियाक्रमः ।
अतस्त्वेतयोरुक्तं पृथक् नेह चिकित्सितम् ॥
तद्भस्मकं गुरुस्निग्धसान्द्रमन्दहिमस्थिरैः ।
अन्नपानैर्नयेच्छान्तिं पित्तघ्नैश्च विरेचनैः ॥
अत्युद्धताग्निशान्त्यै माहिषदधिदुग्धसर्पींषि ।
संसेवेतयवागूं समधूच्छिष्टां ससर्पिष्कां ।
असकृत् पित्तहराणां पायसं प्रतिभोजनं ॥
श्यामात्रिवृद्विपक्वञ्च पयोदद्याद्विरेचनं ॥
यत् किञ्चित् मधुरं मेध्यं श्लेष्मलं गुरु भोजनं ।
सर्व्वं तदत्यग्निहितं भुक्त्वा प्रस्वपनं दिवा" ॥
सितत्रपुलं सितकमलं छागीक्षीरेण पायसं सिद्धं । भुक्त्वा घृतेन पुरुषो द्वादशदिवसाद्भस्मकितो भवेत् ॥*॥ अथ विशिष्टद्रव्याजीर्णे विशिष्टद्रव्यपाचनद्रव्यमाह,—

"अलं पनसपाकाय फलं कदलसम्भवं ।
कदलस्य तु पाकाय बुधैरभिहितं घृतं ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ।
नारिकेलफलतालवीजयोः
पाचकं सपदि तण्डुलं विदुः ।
क्षीरमाम्रं सहकारपाचनं
क्षारमम्लानि हरीतकी हिता ॥
मधूकमालूरकपादनानां
परूषखर्ज्जूरकपित्थकानां ।
पाकाय पेयं पिचुमर्द्दवीजं
घृतेऽपि तक्रेऽपि तदेव देयं ॥
खर्ज्जूरशृङ्गाटकयोः प्रशस्तं
विश्वौषधं कुत्र च भद्रमुस्तं ।
यच्चाक्षवोधिद्रुफलेषु शीतं
ज्ञेयं तथा वार्य्युदितं प्रणीतं ॥
तण्डुलेषु पयसः पयो हितं
दीप्यकन्तु चिपिटे कषायुतं ।
धष्टिका दधिजलेन जीर्य्यते
कर्कटी च सुमनेषु गीर्य्यते" ॥
सुमनेषु गोधूमेषु । गीर्य्यते कथ्यते ।
"गोधूममाषहरिमन्थसतीलमुद्ग-
पाको भवेत् झटिति मातुलपुत्रकेण ।
खण्डञ्च खण्डयति माषभवं त्वजीर्णं
तैलं कुलत्थमथवा विदधाति जीर्णं" ॥
मातुलपुत्रकः धुस्तूरफलं ।—
"कङ्गुश्यामाकनीवाराः कुलत्थस्याविलम्बितं ।
दध्ना जलेन जीर्य्यन्ति वैदलाः काञ्जिकेन तु ॥
पिष्टान्नं शीतलं वारि क्षण्णरान् सैन्धवं पचेत् ।
माषेण्डरी निम्बमूलं पायसं मुद्गयूषकैः" ॥
वटोवेशवाराज्यवङ्केन फेणीशमं पर्पटः शिग्रुवीजेन याति । कणामूलतो लड्डुकापूपशष्कुलीविपाको भवेच्छष्कुली मण्डयोश्च ॥ वेशवारः वेसर इति लोके । तद् यथा ।—
"खेदो निशाहिङ्गुलवङ्गफेला-
धान्याकजीरार्द्रकनागराणि ।
अम्लोपयां सैन्धवपूर्णमन्ने
यथोचितं संस्कृतये प्रणीतम्" ॥ इति ॥
शष्टा शष्टकः पानकविशेषः । मण्डः माण्डे इति लोके ।—
"किमत्र चित्रं बहुमत्स्यमांस
भोजी सुखी काञ्जिकपानतः स्यात् ।
हयङ्कृतं केवलवह्निपक्व-
मांसेन मत्स्यः परिपाकमेति ॥
आमम्रामफलं मीने तदीजं पिशिते हितं ।
कूर्म्ममांसं यवक्षाराच्छीघ्रं पाकमुपैति हि ॥
कपोतपारावतनीलकण्ठ
कपिञ्जलानां पिशितानि भुक्त्वा ।
काशस्य मूलं परिपीय पिष्टं
सुखी भवेन्ना बहुशो हि दृष्टं ॥
कपोतो धवलः पाण्डुः ।
"शाकानि सर्व्वाण्यपि यान्ति
पाकं क्षारेण सद्यस्तिलजानलेन ।
चञ्चूकसिद्धार्थकवास्तुकानां
गायत्रिसारक्वथितेन पाकः" ॥
चञ्चूकं चेचूश इति लोके । गायत्री खदिरः ।
"पलङ्किकाकोसुककारवेल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानां ॥
उपोदिकालावुपटोलकानां
सिद्धार्थको मेघरवस्य पक्ता" ॥
मेघरवः चवराई इति लोके ।—
"विपच्यते शूरणकं गुडेन
तथालुकं तण्डुलजोदकेन ।
पिण्डालुकं जीर्य्यति कोरदूषात्
कशेरुपाकः किल नागरेण ॥
लवणस्तण्डुलतोयात् सर्पिर्जम्बीरकाद्रसात् ।
मरिचादपि तच्छीघ्रं पाकं यात्येव काञ्जिकात्तैलं ॥
क्षीरं जीर्य्यति तक्रेण तद्दध्यं कोषाम्रमण्डकात् ।
माहिषं माणिमन्थेन शङ्खचूर्णेन तद्दधि" ॥
मण्डकः माण्डे इति लोके,—
"रसाला जीर्य्यति व्योषात् खण्डं नागरभक्षणात् ।
सिता नागरमुस्तेन तथेक्षुश्चार्द्रकारसात् ।
जरासिराशैरिकचन्द्रनाभ्या-
मश्वेति शीघ्रं मुनिभिः प्रणीतं ।
उष्णेन शीतं शिशिरेण चोष्णं
जीर्णो भवेत् क्षारगणस्तथाम्लैः" ॥
इरा मदिरा ।
"तप्तं तप्तं हेम वा तारमश्मो
तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।
पीत्वाजीर्णं तोयजातं निहन्या-
त्तच्च क्षौद्रं भद्रयुक्तं विशेषात्" ॥
तत्र तोयाजीर्णे । इति जठराग्निविकाराजीर्णविसूचिकालसविलम्बिकाचिकित्सा । इति भावप्रकाशः ॥

अजीवः, त्रि, (नास्ति जीवः आत्मा यस्य स बहुव्रीहिः) मृतः । अवसन्नः । इति त्रिकाण्डशेषः ॥

अजीवनिः, स्त्री, (नञ् + जीव + आक्रोशेनञ्यनिरिति सूत्रेण अनिः) जीवनाभावः । अकरणिः । शापः । यथा । तस्माजनविरेवास्तु । इत्यमरटीकायां भरतः ॥ अजीवनिस्तव भूयात् । इति मुग्धबोधं ॥

अजुगुप्सितः, त्रि, (गुप् + सन् + क्त न जुगुप्सित नञ् समासः) अनिन्दितः । यथा,—
"उपवेश्य तु तान् विप्रानासनेष्वजुगुप्सितान् ।
गन्धमाल्यैः सुरभिभिरर्च्चयेद्देवपूर्व्वकं" ॥
इति मानवे ३ अध्याये २०९ श्लोकः ॥

अजेयः, त्रि, (न जेयः नञ् समासः) इति नञ्पूर्व्वकजिधातोः कर्म्मणि यत्प्रत्ययः । अजेतव्यः । अजयनीयः । यथा ।—
"अजेयस्त्वञ्च संग्रामे ममापि हि भविष्यति" ।
इति स्कान्दे काशीखण्डे २३ अध्यायः ।

अज्येष्ठवृत्तिः, पुं, (ज्येष्ठस्य वृत्तिः आचरणं षष्ठीतत्पुरुषः नास्ति ज्येष्ठवृत्तिः ज्येष्ठाचरणं यस्य सः बहुव्रीहिः) ज्येष्ठवृत्तिरहितः । भ्रातृषु पितृवद्वर्त्तनाभाववान् । यथा,—